**विसर्जित** *p. p.* 1 Emitted, sent forth. -2 Given away. -3 Left, quitted, abandoned. -4 Sent, despatched. -5 Dismissed.

**विसृष्ट** *p. p.* 1 Emitted, sent forth. -2 Created, emanated. -3 Shed, cast. -4 Sent, despatched; भोजेन दूतो रघवे विसृष्टः R. 5. 39. -5 Dismissed, let go, discharged; विसृष्टपार्श्वानुचरस्य तस्य R. 2. 9. -6 Discharged, hurled. -7 Given, bestowed, granted; ग्रामेष्वात्मविसृष्टेषु R. 1. 44. -8 Abandoned, quitted, removed. -9 Cast out, expelled.

**विसृष्टिः** *f.* 1 Emitting, sending forth. -2 Abandoning. -3 Giving. -4 Emission (of semen). -5 Secondary creation. -6 Offspring.

**विसृप्** 1 P. 1 To move, march, proceed; यः सुबाहुरिति राक्षसोऽपरस्तत्र तत्र विससर्प मायया R. 11. 29; 4. 53. -2 To fly or roam about. -3 To spread; मनोरागस्तीव्रं विषमिव विसर्पत्यविरतम् Māl. 2. 1. -4 To flow along, fall down; (बाष्पः) विसर्पन् धाराभिर्लुठति धरणीं जर्जरकणः U. 1. 29. -5 To escape, run away. -6 To hover about. -7 To wind, meander. -8 To spread, diffuse; विसर्पयन्ति च ते यशः Bhāg. 4. 1. 31.

**विसर्पः** 1 Creeping about, gliding. -2 Moving to and fro. -3 Spread, circulation; किमु विषविसर्पः किमु मदः U. 1. 36. -4 An unexpected or unwished-for consequence of an act. -5 A sort of disease, dry spreading itch; लवणाम्लकटूष्णादिसेवनाद्दोषकोपतः। विसर्पः सप्तधा ज्ञेयः सर्वतः परिसर्पणात् ॥ **-Comp. -घ्नम्** wax.

**विसर्पणम्** 1 Creeping along, gliding, going gently. -2 Diffusion, spreading, extending. -3 Increase, growth.

**विसर्पिः, -विसर्पिका** See विसर्प (5) above.

**विसर्पिन्** *a.* 1 Creeping, shooting forth. -2 Gliding, roaming; नलिनमुखान्तविसर्पि पङ्कजिन्याः Ki. 10. 33. -3 Spreading, increasing. -4 Suffering from the disease विसर्प.

**विस्तः** A particular weight of gold (= 80 रक्तिकाs).

**विस्तृ** 5 U., **विस्तॄ** 9 U. 1 To spread, diffuse. -2 To cover, fill. -3 To extend, expand. -4 To strew or scatter about. -5 To speak diffusively about. *-Caus.* 1 To cause to spread or expand; as in पयोधरविस्तारयितृकं यौवनम् Ś. 1. -2 To increase; विस्तारितः कुञ्जरकर्णतालैः (रेणुः) R. 7. 39. -3 To stretch, extend.

**विस्तरः** 1 Extension, expansion. -2 Minute details, detailed description, minute particulars; संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः। सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे Śi. 2. 24; (विस्तरेण, विस्तरतः, विस्तरशः 'in detail, at length, fully, with minute details, with full particulars'; अङ्गुलिमुद्राधिगमं विस्तरेण श्रोतुमिच्छामि Mu. 1; विस्तरेणात्मनो योगं विभूतिं च जनार्दन (भूयः कथय) Bg. 10. 18). -3 Prolixity, diffuseness; अलं विस्तरेण. -4 Abundance, quantity, multitude, number; उभे पुरवरे रम्ये विस्तरैरुपशोभिते Rām. 7. 101. 14. -5 A bed, layer. -6 A seat, stool. -7 Affectionate solicitation. -8 High degree, intensity. -9 (pl.) Great wealth, riches.

**विस्तारः** 1 Spreading, extension, expansion; प्रान्तविस्तारभाजाम् Māl. 1. 27. -2 Amplitude, breadth; पञ्चयोजनविस्तारम् Mb. 14. 58. 39; विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः R. 2. 11; तत एव च विस्तारम् Bg. 13. 30. -3 Expanse, vastness, magnitude; मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः Me. 18. -4 Details, full particulars; कण्वोऽपि तावच्छ्रुतविस्तारः क्रियताम् Ś. 7. -5 The diameter of a circle. -6 A shrub. -7 The branch of a tree with new shoots.

**विस्तीर्ण** *p. p.* 1 Spread out, expanded, extended. -2 Wide, broad; विस्तीर्णं योजनं स्निग्धं ततो द्विगुणमायतम् Rām. 7. 13. 3. -3 Large, great, extensive. **-Comp. -जानु** *a.* bandy-legged (as a girl, hence unfit for marriage). **-पर्णम्** a kind of root (मानक).

**विस्तृत** *p. p.* 1 Diffused, spread, extended. -2 Broad, expanded. -3 Ample. -4 Diffuse, prolix. -5 Developed. -6 Far-sounding.

**विस्तृतिः** *f.* 1 Extension, expansion. -2 Breadth, width, magnitude. -3 The diameter of a circle.

**विस्था** 1 Ā. 1 To stand apart. -2 To remain, stay, dwell, remain fixed or stationary; पदैर्भुवं व्याप्य वितिष्ठमानम् Śi. 4. 4. -3 To spread, be diffused.

**विस्थान** *a.* Belonging to another place or organ (as a sound).

**विस्पन्दः** 1 See विष्यन्दः. -2 A drop (कण); तस्य शुक्रस्य विस्पन्दान् पांसून् संगृह्य भूमितः Mb. 13. 85. 99.

**विस्पष्ट** *a.* 1 Plain, clear, intelligible. -2 Manifest, evident, obvious, open, apparent.

**विस्फर्, -विस्फुर्** 6 P. 1 To quiver, palpitate, tremble; Mb. 1. 52. 5. -2 To move about, struggle; विस्फुरन्तीं यथाकामं मैथुनायोपचक्रमे Rām. 7. 80. 16; Mb. 1. 125. 8. -3 To shine, gleam; किं नाम विस्फुरन्ति शस्त्राणि U. 4. -4 To draw or twang (as a bow, used in *Caus.* in the same sense); एकोऽपि विस्फुरितमण्डलचापचक्रं कः सिन्धुराजमभिषेणयितुं समर्थः Ve. 2. 26. -5 (esp. विस्फर्) To open wide (eyes). *-Caus.* To draw (a bow); विस्फार्यमाणस्य ततो भुजाभ्यां भूतानि भर्त्रा धनुरन्तकस्य Ki. 17. 24; Rām. 7. 28. 45.

**विस्फारः** 1 Vibration, trembling, throbbing. -2 The twang of a bow; यस्य विस्फारनिर्घोषैः स्तनन्ति स्म दिशो दश Rām 7. 28. 45. -3 Opening wide.

**विस्फारकः** A kind of dangerous fever.

**विस्फारित** *p. p.* 1 Made to vibrate. -2 Trembling, tremulous. -3 Twanged; विकृष्टविस्फारितचापमण्डलः Ki. 14.